# শ্রীমদাঞ্জনেযাষ্টোত্তরশতনামস্তোত্রম্ কালিকারহস্যতঃ

{॥ শ্রীমদাঞ্জনেযাষ্টোত্তরশতনামস্তোত্রম্ কালিকারহস্যতঃ ॥}

আঞ্জনেযো মহাবীরো হনুমান্মারুতাত্মজঃ ।

তত্ত্বজ্ঞানপ্রদঃ সীতাদেবীমুদ্রাপ্রদাযকঃ ॥ ১॥

অশোকবনিকাচ্ছেত্তা সর্বমাযাবিভঞ্জনঃ ।

সর্ববন্ধবিমোক্তা চ রক্ষোবিধ্বংসকারকঃ ॥ ২॥

পরবিদ্যাপরীহারঃ পরশৌর্যবিনাশনঃ ।

পরমন্ত্রনিরাকর্তা পরযন্ত্রপ্রভেদকঃ ॥ ৩॥

সর্বগ্রহবিনাশী চ ভীমসেনসহাযকৃত্ ।

সর্বদুঃখহরঃ সর্বলোকচারী মনোজবঃ ॥ ৪॥

পারিজাতদ্রুমূলস্থঃ সর্বমন্ত্রস্বরূপবান্ ।

সর্বতন্ত্রস্বরূপী চ সর্বযন্ত্রাত্মকস্তথা ॥ ৫॥

কপীশ্বরো মহাকাযঃ সর্বরোগহরঃ প্রভুঃ ।

বলসিদ্ধিকরঃ সর্ববিদ্যাসম্পৎপ্রদাযকঃ ॥ ৬॥

কপিসেনানাযকশ্চ ভবিষ্যচ্চতুরাননঃ ।

কুমারব্রহ্মচারী চ রত্নকুণ্ডলদীপ্তিমান্ ॥ ৭॥

সঞ্চলদ্বালসন্নদ্ধলম্বমানশিখোজ্জ্বলঃ ।
গন্ধর্ববিদ্যাতত্ত্বজ্ঞো মহাবলপরাক্রমঃ ॥ ৮॥

কারাগৃহবিমোক্তা চ শৃঙ্খলাবন্ধমোচকঃ ।
সাগরোত্তারকঃ প্রাজ্ঞো রামদূতঃ প্রতাপবান্ ॥ ৯॥

বানরঃ কেসরিসুতঃ সীতাশোকনিবারকঃ ।
অঞ্জনাগর্ভসম্ভূতো বালার্কসদৃশাননঃ ॥ ১০॥

বিভীষণপ্রিযকরো দশগ্রীবকুলান্তকঃ ।
লক্ষ্মণপ্রাণদাতা চ বজ্রকাযো মহাদ্যুতিঃ ॥ ১১॥

চিরঞ্জীবী রামভক্তো দৈত্যকার্যবিঘাতকঃ ।
অক্ষহন্তা কাঞ্চনাভঃ পঞ্চবক্ত্রো মহাতপাঃ ॥ ১২॥

লঙ্কিণীভঞ্জনঃ শ্রীমান্ সিংহিকাপ্রাণভঞ্জনঃ ।
গন্ধমাদনশৈলস্থো লঙ্কাপুরবিদাহকঃ ॥ ১৩॥

সুগ্রীবসচিবো ধীরঃ শূরো দৈত্যকুলান্তকঃ ।
সুরার্চিতো মহাতেজা রামচূডামণিপ্রদঃ ॥ ১৪॥

কামরূপী পিঙ্গলাক্ষো বার্ধিমৈনাকপূজিতঃ ।

কবলীকৃতমার্তণ্ডমণ্ডলো বিজিতেন্দ্রিয়ঃ ॥ ১৫॥

রামসুগ্রীবসন্ধাতা মহারাবণমর্দনঃ ।

স্ফটিকাভো বাগধীশো নবব্যাকৃতিপণ্ডিতঃ ॥ ১৬॥

চতুর্বাহুর্দীনবন্ধুর্মহাত্মা ভক্তবৎসলঃ ।

সঞ্জীবননগাহর্তা শুচির্বাগ্মী দৃঢব্রতঃ ॥ ১৭॥

কালনেমিপ্রমথনো হরিমর্কটমর্কটঃ ।

দান্তঃ শান্তঃ প্রসন্নাত্মা শতকণ্ঠমদাপহৃত্ ॥ ১৮॥

যোগী রামকথালোলঃ সীতান্বেষণপণ্ডিতঃ ।

বজ্রদংষ্ট্রো বজ্রনখো রুদ্রবীর্যসমুদ্ভবঃ ॥ ১৯॥

ইন্দ্রজিৎপ্রহিতামোঘব্রহ্মাস্ত্রবিনিবারকঃ ।

পার্থধ্বজাগ্রসংবাসী শরপঞ্জরভেদকঃ ॥ ২০॥

দশবাহুর্লোকপূজ্যো জাম্ববৎপ্রীতি বর্ধনঃ ।

সীতাসমেত শ্রীরামভদ্রপূজাধুরন্ধরঃ ॥ ২১॥

ইত্যেবং শ্রীহনুমতো নাম্নামষ্টোত্তরং শতম্ ॥

যঃ পঠেচ্ছৃণুযান্নিত্যং সর্বান্কামানবাপ্নুযাত্ ॥ ২২॥

॥ ইতি শ্রীমদাঞ্জনেযাষ্টোত্তরশতনামস্তোত্রং সম্পূর্ণম্ ॥

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Anjaneya Ashtottara Shatanama Stotram Lyrics in Bengali PDF
% File name : hanuman108str.itx
% Category : aShTottarashatanAma
% Location : doc_hanumaana
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : From Hanumatstavamanjari
% Description-comments : 108 names of Hanuman. From kAlikArahasya
% Latest update : September 14, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website